सप्तमः पाठः

# मञ्जुलमञ्जूषा सुन्दरसुरभाषा

0872CH07



मुनिवरविकसितकविवरविलसित-
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा।
अयि मातस्तव पोषणक्षमता
मम वचनातीता, सुन्दरसुरभाषा॥ १॥

**पदच्छेदः** – मुनिवर-विकसित-कविवर-विलसित-मञ्जुल-मञ्जूषा सुन्दरसुरभाषा। अयि मातः! तव पोषणक्षमता मम वचनातीता सुन्दरसुरभाषा।

**अन्वयः** – (त्वं) मुनिवरविकसितकविवरविलसितमञ्जुलमञ्जूषा सुन्दरसुरभाषा (असि)। अयि मातः! तव पोषणक्षमता मम वचनातीता अस्ति।

**भावार्थः** – संस्कृतभाषा अतीव सुन्दरभाषा देवभाषारूपेण च परिचिता अस्ति। मुनयः अस्याः संस्कृतभाषायाः विकासं कृतवन्तः। एषा भाषा भूयिष्ठानां भारतीयभाषाणां, तथा विश्वस्य बहूनां भाषाणां च जननी-भाषा (स्रोतो-भाषा) गुरुभाषा (पूरक-भाषा) वा अस्ति। बहवः कवयः काव्यरचनया अस्याः सौन्दर्यं वर्धितवन्तः। कोमलपदावल्या परिपूर्णा एषा ज्ञानपेटिका अस्ति। संस्कृतभाषा स्वपदावलिभिः अन्याः भाषाः ज्ञानं विज्ञानं च परिपोषयति। संस्कृतभाषायाः गौरवं वर्णनातीतम् अस्ति।





**वेदव्यास-वाल्मीकि-मुनीनां**
**कालिदास-बाणादिकवीनाम्।**
**पौराणिक-सामान्य-जनानां**
**जीवनस्य आशा, सुन्दरसुरभाषा॥ २॥**



**पदच्छेदः** – वेदव्यास-वाल्मीकि-मुनीनाम् कालिदास-बाणादिकवीनाम् पौराणिक-सामान्य-जनानाम् जीवनस्य आशा सुन्दरसुरभाषा।

**अन्वयः** – (त्वं) वेदव्यासवाल्मीकिमुनीनां कालिदास-बाणादिकवीनां पौराणिक-सामान्यजनानां जीवनस्य आशा (असि)। त्वं सुन्दरसुरभाषा (असि)।

**भावार्थः** – संस्कृतभाषा अति रमणीया भाषा अस्ति। वाल्मीकि-वेदव्यास-इत्यादयः मुनयः रामायण-महाभारत-पुराणादीन् ग्रन्थान् रचितवन्तः। कालिदास-बाणभट्ट-प्रभृतयः विशिष्टाः कवयः अपि उपादेयानि काव्यानि रचितवन्तः। प्राचीनकालाद् आरभ्य इदानीं यावत् सामान्यजनानां जीवनं संस्कृतभाषया रचितैः काव्यैः प्रभावितम् अस्ति। संस्कृतभाषा बहूनां लक्ष्याणां प्रापिका अस्ति। अतः संस्कृतभाषा सुन्दरभाषा अस्ति।

© NCERT not to be republished





श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे।
गति-मति-प्रेरक-काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा॥ ३॥

**पदच्छेदः** – श्रुतिसुखनिनदे सकलप्रमोदे स्मृतिहितवरदे सरसविनोदे गति-मति-प्रेरककाव्यविशारदे तव संस्कृतिः एषा सुन्दरसुरभाषा।

**अन्वयः** – हे! श्रुतिसुखनिनदे! सकलप्रमोदे! स्मृतिहितवरदे! सरसविनोदे! गति-मति-प्रेरक-काव्यविशारदे! तव एषा संस्कृतिः (अस्ति)। (त्वं) सुन्दरसुरभाषा (असि)।

**भावार्थः** – वस्तुतः रमणीया देवत्वविधायिनी संस्कृतभाषा संस्कृतेः जननी सदृशी अस्ति। संस्कृतभाषायाः ध्वनिश्रवणेन सुखं वर्धते, सर्वे जनाः आनन्दिताः भवन्ति। संस्कृतभाषा वररूपेण संस्कारजन्यं ज्ञानं प्रयच्छति, सरसं विनोदभावं च प्रकाशयति। मानवजीवने उत्तमां गतिं बुद्धिं च प्रददाति। काव्यशास्त्रपरिपूर्णा संस्कृतभाषा अस्माकं संस्कृतिं रक्षति प्रसारयति च।



**नवरस-रुचिरालङ्कृति-धारा**
**वेदविषय-वेदान्त-विचारा।**
**वैद्य-व्योम-शास्त्रादि-विहारा**
**विजयते धरायां, सुन्दरसुरभाषा॥ ४॥**

**पदच्छेदः** – नवरस-रुचिरा अलङ्कृति-धारा वेदविषय-वेदान्त-विचारा। वैद्य-व्योम-शास्त्रादि-विहारा विजयते धरायाम् सुन्दरसुरभाषा।

**अन्वयः** – नवरस-रुचिरा अलङ्कृतिधारा वेदविषयवेदान्तविचारा वैद्यव्योमशास्त्रादिविहारा धरायां सुन्दरसुरभाषा विजयते।

**भावार्थः** – संस्कृतकाव्यशास्त्रेषु शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्त-प्रभृतयः नवसंख्याकाः रुचिराः रसाः सन्ति। शब्दार्थपूर्णाः विविधाः अलङ्काराः शोभन्ते। वेद-उपनिषद्-वेदान्त-पुराणादीनां विचाराः जनान् अभिप्रेरयन्ति। चिकित्साविज्ञान-खगोलशास्त्रादिभिः सह संस्कृतभाषा पृथिव्यां विहरति। एवं संस्कृतभाषा सर्वत्र विजयते।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| विकसिता | विस्तारिता | विकसित की गई | Progressively developed | |
| विलसिता | रञ्जिता | आनन्द देने वाली | That which gives joy | |
| मञ्जुला | मनोहरा | मन को हरने वाली | Lovely / Charming | |
| मञ्जूषा | पेटिका | पेटी | Box / Encasement | |
| पोषणक्षमता | पालनशक्तिः | पोषण की क्षमता | Nurtuning capacity | |
| मे | मम | मेरे | Mine | |
| अतीता | अतिक्रान्ता | पार हो | Beyond | |
| वृन्दानाम् | समूहानाम् | समूहों की | Of groups | |
| नवम् | नूतनम् | नई | New | |
| वचनातीता | वर्णनातीता | वाणी से परे | Beyond words | |
| भूयिष्ठानाम् | अधिकतराणाम् | अधिकांश | Mostly | |



© NCERT not to be republished

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| श्रुतिसुखनिनदे ! | श्रवणसुखध्वनिदात्रि ! | कर्णप्रिय ध्वनि देने वाली ! | Sound of which is pleasant to listen | |
| सकलप्रमोदे ! | सर्वेभ्यः आनन्दमयि ! | सभी को आनन्द देने वाली | That which gives pleasure to all | |
| सरसविनोदे | सरसविनोदशीले | मधुर विनोद करने वाली | That which creates pleasant humour | |
| काव्यविशारदे ! | काव्यपारङ्गते | काव्य करने में पारंगत | Oh! Proficient in Literature | |
| रुचिरा | रुचिकरा | आनन्द प्रदान करने वाली | That which gives happiness | |
| अलङ्कृतिधारा | अलङ्काराणाम् आधात्री | अलंकारों को धारण करने वाली | Well ornamented | |
| व्योमशास्त्रम् | अन्तरिक्षशास्त्रम् | अन्तरिक्ष विज्ञान | Astronomy | |
| धरायाम् | पृथिव्याम् | धरती पर | On earth | |

## अत्र इदम् अवधेयम्

परस्परसम्बद्धानां सार्थकपदानाम् एकपदीभावः समासः इति कथ्यते। प्रायेण द्वयोः ततोऽधिकानां वा पदानां संक्षिप्तीकरणं नाम समासः।

यथा, नद्याः तीरम् – नदीतीरम्, राज्ञः पुत्रः – राजपुत्रः, सुराणां भाषा – सुरभाषा, पोषणस्य क्षमता – पोषणक्षमता, वचनम् अतीता – वचनातीता, नवसंख्याकाः रसाः – नवरसाः, नवरसैः रुचिरा – नवरसरुचिरा।

समासानां विविधाः प्रभेदाः सन्ति – अव्ययीभावः, तत्पुरुषः, कर्मधारयः, द्विगुः, द्वन्द्वः, बहुव्रीहिः च इति।

अव्ययीभावसमासे प्रायः पूर्वम् अव्ययपदस्य प्रयोगः भवति। यथा – रूपस्य योग्यम् – अनुरूपम्।

तत्पुरुषसमासे परपदस्य प्राधान्यं भवति। यथा – सुराणां भाषा – सुरभाषा।

द्विगुसमासे पूर्वं संख्यावाचकपदस्य व्यवहारः भवति। यथा, पञ्चानां वटानां समाहारः – पञ्चवटी।

बहुव्रीहिसमासे अन्यपदस्य प्राधान्यं भवति। यथा, पीतम् अम्बरं यस्य सः – पीताम्बरः (श्रीविष्णुः)।

© NCERT not to be republished

## अभ्यासात् जायते सिद्धिः

१. अधः प्रदत्तानां प्रश्नानां एकपदेन उत्तरं लिखत—

(क) सुन्दरसुरभाषा कस्य वचनातीता? ....................

(ख) संस्कृतभाषा कुत्र विजयते? ....................

(ग) संस्कृतभाषा कस्य आशा? ....................

(घ) संस्कृते कति रसाः सन्ति? ....................

(ङ) कस्याः ध्वनिश्रवणेन सुखं वर्धते? ....................

२. अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत—

(क) संस्कृतभाषा केषां जीवनस्य आशा अस्ति?

....................

(ख) केषां विचाराः जनान् अभिप्रेरयन्ति?

....................

(ग) कैः रसैः समृद्धा साहित्यपरम्परा विराजते?

....................

(घ) संस्कृतभाषा केषु शास्त्रेषु विहरति?

....................

(ङ) संस्कृतभाषायाः कानि कानि सम्बोधनपदानि अत्र प्रयुक्तानि?

....................

३. रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत—

(क) मुनिगणाः <u>संस्कृतभाषायाः</u> विकासं कृतवन्तः। ....................

(ख) सामान्यजनानां जीवनं <u>काव्यैः</u> प्रभावितम् अस्ति। ....................

(ग) कवयः अपि <u>उपादेयानि</u> काव्यानि रचितवन्तः। ....................

(घ) संस्कृतभाषा <u>पृथिव्यां</u> विहरति। ....................

© NCERT not to be republished

(ङ) संस्कृतभाषा विविधभाषाः परिपोषयति। ..................................................

(च) वेद-वेदाङ्गादीनि गभीराणि शास्त्राणि सन्ति। ..................................................

## ४. अधः प्रदत्तानां पदानाम् उदाहरणानुसारं विभक्तिं वचनं च लिखत—

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – | मातः | सम्बोधनम् | एकवचनम् |
| | तव | .......................... | .......................... |
| | मञ्जूषा | .......................... | .......................... |
| | संस्कृतिः | .......................... | .......................... |
| | जनानाम् | .......................... | .......................... |
| | जीवनस्य | .......................... | .......................... |
| | धरायाम् | .......................... | .......................... |
| | शास्त्रेषु | .......................... | .......................... |

## ५. अधोलिखितानां पद्यांशानां यथायोग्यं मेलनं कुरुत—

| | कवर्गः | खवर्गः |
|---|---|---|
| (क) | अयि मातस्तव पोषणक्षमता | स्मृतिहितवरदे सरसविनोदे |
| (ख) | वेदव्यास-वाल्मीकि-मुनीनां | विजयते धरायाम् |
| (ग) | पौराणिक-सामान्यजनानाम् | मम वचनातीता, सुन्दरसुरभाषा |
| (घ) | श्रुतिसुखनिनदे सकलप्रमोदे | कालिदासबाणादिकवीनाम् |
| (ङ) | वैद्यव्योम-शास्त्रादिविहारा | जीवनस्य आशा, सुन्दरसुरभाषा |

## ६. उदाहरणानुसारम् अधः प्रदत्तानां पदानाम् एकपदेन अर्थं लिखत—

यथा, देवस्य आलयः = देवालयः

(क) सुराणां भाषा = ..........................

(ख) सुन्दरी सुरभाषा = ..........................

(ग) नवरसैः रुचिरा = ..........................







© NCERT not to be republished

(घ) पोषणस्य क्षमता = ..........................

(ङ) मञ्जुला भाषा = ..........................

## ७. पेटिकातः पदानि चित्वा रिक्तस्थानानि पूरयत—

कालिदासबाणादि, आशा, संस्कृतिः, विजयते, मम, वेदविषय, मञ्जुलमञ्जूषा, सकलप्रमोदे

यथा – मुनिवर-विकसित-कविवर-विलसित- ....मञ्जुलमञ्जूषा.... सुन्दरसुरभाषा।

(क) अयि मातः तव पोषणक्षमता .......................... वचनातीता।

(ख) वेदव्यास-वाल्मीकि-मुनीनां .......................... कवीनाम्।

(ग) पौराणिक-सामान्य-जनानां जीवनस्य .......................... ।

(घ) श्रुतिसुखनिनदे .......................... स्मृतिहितवरदे सरसविनोदे।

(ङ) गति-मति-प्रेरक-काव्य-विशारदे, तव .......................... एषा सुन्दरसुरभाषा।

(च) नवरस-रुचिरालङ्कृतिधारा .......................... -वेदान्तविचारा।

(छ) वैद्य-व्योम-शास्त्रादि-विहारा .......................... धरायाम्, सुन्दरसुरभाषा।

## ८. अधोलिखितविकल्पेषु प्रसङ्गानुसारम् अर्थं चिनुत—

(क) "मञ्जुलमञ्जूषा" इत्यस्य अर्थः कः?

(i) कठोरभाषा (ii) शोचनीया भाषा

(iii) मनोहररूपेण संकलिता (iv) सामान्यभाषा

(ख) सुन्दरसुरभाषा केषां जीवनस्य आशा उच्यते?

(i) केवलं कवीनाम् (ii) बालकानाम्

(iii) पौराणिक-सामान्यजनानाम् (iv) छात्राणाम्

(ग) सुन्दरसुरभाषा कुत्र विजयते ?

(i) आकाशे (ii) जलधौ

(iii) धरायाम् (iv) पवने

(घ) सुन्दरसुरभाषायां किं नास्ति ?

(i) शास्त्रज्ञानम् (ii) संस्कृतिः

(iii) वेदान्तचिन्तनम् (iv) अशुद्धिः



© NCERT not to be republished

(ङ) कविः सुन्दरसुरभाषां केन पदेन सम्बोधयति?

(i) पितः (ii) मातः

(iii) भ्रातः (iv) दातः

## योग्यताविस्तरः

### संस्कृतप्रशस्तयः

१. मातृभूमिः सदा सेव्या मातृभाषा तथैव च।
भारतं मातृभूमिर्नो मातृभाषा हि संस्कृतम्॥

२. भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।
विहाय संस्कृतं नास्ति संस्कृतिः संस्कृताश्रिता॥

३. पुरुषाः संस्कृताः सन्तु महिलाः सन्तु संस्कृताः।
संस्कृतेन विचारेण राष्ट्रं भातु सुसंस्कृतम्॥

४. संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।
वेदतत्त्वार्थसञ्जुष्टं लोकालोककरं शिवम्॥

५. यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम्॥



© NCERT not to be republished

## परियोजनाकार्यम्

**१. संस्कृतेन जीवनं कथं समृद्धं भवेत् इति अधिकृत्य 'सुन्दरसुरभाषा धरायां विजयते' इति संस्कृतनाटिकया छात्राः जागरूकाः करणीयाः।**

**२. सरलसंस्कृतगीतानां सङ्ग्रहं कुरुत कक्षायां च गायत।**
**यथा – सुरससुबोधा विश्वमनोज्ञा, मनसा सततं स्मरणीयम्, मृदपि च चन्दनमस्मिन् देशे, इत्यादीनि।**

**३. संस्कृतसाहित्ये प्रसिद्धानां कवीनां काव्यानां च सङ्ग्रहः करणीयः।**